National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 272-278
© 2026 NJHSR
www.sanskritarticle.com

**गौराङ्ग साउ**
शोधछात्रः,
बाँकुडा-विश्वविद्यालयस्य,
पश्चिमबङ्गप्रदेशस्य,

**Correspondence:**
**गौराङ्ग साउ**
शोधछात्रः,
बाँकुडा-विश्वविद्यालयस्य,
पश्चिमबङ्गप्रदेशस्य

# कालिदासरूपकेषु प्रेमिक-प्रेमिकयोः चरितविमर्शः

**गौराङ्ग साउ**

**शोधसारः**

महाकविना कालिदासेन नाटकत्रयं विरचितम् मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशकुन्तलं चेति। अस्मिन् रूपकत्रये प्रेमिक-प्रेमिकानां चरित्रेषु मानवीयजीवानुभवसमन्वितं प्रतिपादितम्। कालिदासेन अग्निमित्रे मानवीयसर्वदोषगुणाःआरोपिताः। अग्निमित्रः राजा अपि हृदयेन साधारणमनुष्यवत्। तस्य प्रणयः गौरवं न हरति, अपितु तस्य मानवीयत्वं प्रकाशयति। वस्तुतः अत्र कालिदासेन अग्निमित्रः संस्कृतनाट्यकाशे प्रेमिकनायकेषु स्वाभाविकरसिकभावुकपुरुषरूपेण अङ्कितः। कालिदासेन मालविकायाः प्रेमिकास्वरूपम् अत्यन्तं सौम्यतया चित्रितम्। मालविका माधुर्यस्य प्रतिमूर्तिः। मालविकायाः प्रणये करूणरसस्य प्रभावः परिलक्ष्यते। प्रेमिकरूपेण पुरुरवा महाकविकालिदासस्य अनन्या सृष्टिः । प्रेमिकः पुरूरवा न केवलं वीरनृपः अपि तु अत्यन्तसंवेदनशीलः, विरहविह्वलः च । तस्मिन् काले वीरभोग्यः वसुन्धरेव वीरभोग्या वरङ्गना इति नीतिः सामाजिकैः अनुमोदितासीत् इति न संशयः। कालिदासेन ऊर्वशी स्वर्गीयसुन्दरी अप्सरा प्रेमविह्वला भावुका च स्वरूपेण चित्रिता। सा पुरूरवसं प्रति समर्पिता किन्तु स्वगौरवं न त्यजति। कालिदासेन दैवीस्त्रीरूपत्व-ऊर्वशीमध्ये मानवीयदुःखानुभवः आरोपितः कृतः। अभिज्ञानशकुन्तले दुष्मन्त-शकुन्तलयोः प्रेम आदर्शमानवीयप्रेमस्य मूर्तस्वरूपेण उपस्थापितम्। अस्मिन् नाटके महाकविना दुष्यन्तचरितं प्रेमिकरूपेण अत्यन्तगम्भीरव्यक्तित्वं प्रकाशयति। अत्र दुष्यन्तः प्रेमिकरूपेण सुव्यक्तित्वं धारयति। स केवलं न रूपासक्तः कामुकः, अपि तु भावुकः, चिन्ताशीलः, धार्मिकः, धर्मसंशयपीडितः, स्मृतिविह्वलः च आदर्शप्रेमिकः। अत्र कालिदासेन स्त्रीहृदयस्य स्वाभाविकलज्जा अलंकाररूपेण चित्रिता। सा प्रेमिकारूपा शकुन्तला गभीरा स्थितिः, या न सुपरिज्ञेया। अत्र प्रेमिकायाः शकुन्तलायाः चरित्रे सत्यपरायणतायाः आत्मसम्मानस्य पतिव्रतनिष्ठायाः च समन्वयः दृश्यते।

**मुख्यशब्दाः**- प्रणयः, प्रेमिकचरितम्, प्रेमिकाचरितम्, अग्निमित्रः, मालविका, पुरूरवा, ऊर्वशी, दुष्यन्तः, शकुन्तला ।

**उपोद्घातः**

विश्वसंस्कृतसाहित्यगगने महाकविः कालिदासः रविरिव विराजते। व्यासवाल्मीकोः परं कालिदासः एव श्रेष्ठः कविः। स एव भारतवर्षस्य गौरवो विश्वगौरवश्च। तेन न केवलं भारतवर्षस्य साहित्ये विश्वसाहित्ये अपि तस्य प्रतिभा प्रतिष्ठिता। अतः उच्चते-"कविषु कालिदासः श्रेष्ठः" इति । सर्वैः एव विश्वसाहित्यजगति कालिदास एव भारतवर्षस्य श्रेष्ठः कविरिति अभिनन्दितः।

**"सहृदयं सांमनस्यम्, अविद्वेषं कृणोमि वः।**
**अन्यो अन्यमभिहर्यत, वत्सं जातमिवाघ्न्या।।"**[1] इति ।

अतः परमात्मोऽहं सहृदयत्वं, सांमानसं विद्वेषराहित्वमिति सदगुणान् सृजामि। सर्वे जनाः मिलित्वा प्रीत्या, सौहार्देन निवसेयुः, द्वेषं परित्यजेयु च। वस्तुतः प्रेमिक-प्रेमिकयोः मध्ये अपि एतादृशाः गुणाः अपेक्षनीयाः। कालिदासस्य रूपकेषु प्रेमिकप्रेमिकानां चरित्रचित्राङ्कनं परिलक्ष्यते। महकविः शृङ्गारस्य मनोवैज्ञानिकदर्शी कविः इति निर्विवादम्। कालिदासेन प्रेमिक-प्रेमिकानां चरित्रचित्रनार्थं बाह्यसौन्दर्यं प्रदत्तम् अपि च तेषाम् अन्तःकरणचेष्टाः, आकाङ्खाः, आशङ्काः, विरहवेदनाः, धर्मसंशयाः, स्मृतिप्रवाहाः

च अत्यन्तसूक्षतया निरुपिताः। तस्य काव्येषु प्रेम न केवलं रतिमात्रस्य विषयः अपि तु संस्कारः, धर्मः, तपः, आत्मसमर्पणं, जीवनानुभव-समन्वितविषयः च।

**विषयः**

**मालविकाग्निमित्रे**

कालिदासेन मालविकाग्निमित्रमिति नाटके प्रेम ललितरूपेण राजपरिवेशे प्रकाशितम्। अत्र प्रेममध्ये हास्यतत्त्वस्य मेलनम् अपिच अनुरागस्य गम्भीररूपं प्रकटितम्। अस्मिन् नाटके मालविकायाः अग्निमित्रस्य च प्रणयः ऐतिहासिकविषयमवलम्ब्य महाकविना विरचितः।

अग्निमित्रः राजा अपि केवलं राजकर्तव्यपरायणः न अपितु अनुरागे उत्कण्ठितः भावुकहृदयः सौन्दर्यसंवेदनशीलः चञ्चलचित्तः च पुरुषः इति बहुरूपेण प्रकाशयति। अत्र कालिदासः राजर्षिपुरुषे अग्निमित्रे साधारणमानवीयगुणानां यथा प्रेमदौर्वल्यम् ईर्षाम् आकुमतां दुःखं हर्षं च सुक्षतया चित्रयति। नाटकेऽस्मिन् नृपः एव आदौ मालविकायाः दर्शनेन आकर्षितः भवति। चित्रपटं दृष्ट्वा अपि तस्य मनसि प्रणयस्य अनुरागाङ्कुरः प्रस्फुटति। प्रथमा चेटी कथयति यथा-"अपूव्वा इअं दारिआ देवीए आसण्णालिहिदा किं णामहेएत्ति।"[2] इति। अत्र राज्ञः मनसि चित्रदर्शनात् परं कल्पनाशक्तिः विकशयति। तेन न केवलं मालविकां दृश्यते अपि तु स्वहृदये तस्याः स्वरूपम् आलिखति। अत्र प्रेम कल्पनापोषितः। गोपनीयता अग्निमित्रस्य प्रणये विशेषः पक्षः। तस्य राजमहिषी धारिणी अस्ति, तेन सह स्वानुरागं प्रत्यक्षं प्रकाशयितुं न शक्नोति। एतेन नृपस्य चित्ते द्वन्द्वम् उत्पद्यते। स मित्रेण विदूषकेण सह हृदयस्य वेदनां प्रकाशयति। स मित्रसहायेन स्वप्रेममार्गं सुकरं करोति। अत्र मैत्रिभावस्य भूमिका अपि दृश्यते। अग्निमित्रस्य चरित्रे विश्वासशीलता परिलक्ष्यते। विदूषकं प्रति राजा कथयति- वयस्य!

"नेपथ्यगृहगतायाशचक्षुर्दर्शनसमुत्सुखं तस्याः।
संहर्त्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम्।"[3] इति।

अग्निमित्रस्य प्रणये उत्कण्ठा परिलक्ष्यते। स मालविकां द्रष्टुमिच्छति। मालविकायाः दर्शनात् परं स मोहितः भवति। तस्य अनुरागे सौन्दर्यबोधस्य प्रमुखता दृश्यते। रूपसंवेदनशीलः स राजा मालविकां रूपलावन्यं दृष्ट्वा विदुषकं वदति-( अपवार्य) वयस्य!

"चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम्।
सम्प्रति शिथिलसमाधिकं मन्ये येनेयमालिखिता।।"[4]इति।

अपिच राजर्षिणा अग्निमित्रेण उक्तं – (स्वागतम्) अहो! सर्व्वास्ववस्थास्वनवद्यता रूपस्य तथा हि-

"दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंशयोः,
संक्षिप्तं निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितोऽमितश्च जघनं पादावरालाङ्गुली,
छन्दो नर्त्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः।।"[5]इति।

प्रेमिकः यथा प्रेमिकां प्रति अनुरागवशात् सर्वदा आत्मपक्षे एव चिन्तयति तथैव राजा अग्निमित्रः मालविकायाः गीतं श्रुत्वा स्वपक्षे चिन्तयति यत्- एतत् संगीतं मत्कृते। तेन कथितं- "सखे ! एवमेव ममापि हृदयम्। अनया खलु,

जनमिममनुरक्तं विद्धि नाथेति गेये, वचनमभिनयन्त्या स्वाङ्गनिर्देश-पूर्व्वम्।
प्रणयगतिमदृष्ट्वा धारिणीसन्निकर्षादहमिव सुकुमारप्रार्थनाव्यज-मुक्तः।।"[6] इति।

अग्निमित्रेण मालविकायाः शरीरस्य अङ्गादिविषये रमणीयता प्रकटिता-

"वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्वे,
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं,
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम्।।"[7]इति

अग्निमित्रः न केवलं मालविकायाः अङ्गादिरूपं प्रति आकृष्टः अपिच तस्याः नर्तककलां संगीतानुरागं लज्जाविणयादिगुणान् दृष्ट्वा अनुरक्तः। "वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः"[8] इति राज्ञः वचनात् एव अस्माभिः एतत् ज्ञायते। नृपः सन् अपि अग्निमित्रः प्रणये निर्वलः इव परिलक्ष्यते। तेन यदा बाधितः, तदा क्लेशेन व्याकुलः भवति। अत्र कालिदासः दर्शयति यत् राजर्षिसत्त्वा हृदयस्य वेदनां न निवारयति। प्रणये राजा साधारणमनुष्यः वा सर्वे अत्र समानाः। राज्ञः व्याकुलतां दृश्यते तस्य वचने-

"शरीरस्य क्षामं स्यादस्यति दयितालिङ्गनसुखे,
भवेत् सास्रं चक्षुः क्षणमपि न सा दृश्यत इति।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं,
प्रसक्ते निर्व्वाणे हृदय ! परितापं व्रजसि किम्।।"[9]इति

यदा मालविका अन्येषां समीपे दृष्यते, तदा अग्निमित्रस्य चित्ते असन्तोषः उत्पद्यते। कदाचित् राज्ञः चरित्रे ईर्षा प्रकाशिता। अत्र पुरुषप्रणये स्वामित्वबोधः सञ्जातः। मालविकां प्रति अग्निमित्रस्य प्रणयः पर्याक्रमेण परिवर्तनशीलः। आदौ रूपाकर्षणम्, ततः संवादानन्दः, अनन्तरं विरहव्यवस्था। तेन न केवलं रमनीयतायां मोहितः, अपि तु स्थायिभावेन अनुरक्तः। कालिदासमते प्रणयः यद्यपि स्वाभाविकः तथापि सामाजिकसुक्रिर्तिं प्राप्नोति। अग्निमित्रस्य प्रेमिकस्वरूपे श्रृङ्गारहास्यकरुणोत्साहातिरसाः अन्तर्निहिताः भवन्ति। अग्निमित्रः राजा तथापि स कलानुरागी। स न केवलं कामप्रियः रसानुभवशीलः। कालिदासेन अग्निमित्रे मानवीयसर्व-दोषगुणाःआरोपिताः। अग्निमित्रः राजा अपि हृदयेन साधारण-मनुष्यवत्। तस्य प्रणयः गौरवं न हरति, अपितु तस्य मानवीयत्वं प्रकाशयति। वस्तुतः अत्र कालिदासेन अग्निमित्रः संस्कृतनाट्यकाशे प्रेमिकनायकेषु स्वाभाविकरसिकभावुकपुरुषरूपेण अङ्कितः।

मालविकाग्निमित्रमिति नाटके नायिकाप्रेमिकास्वरूपे मालविका तु विनयवती कोमला ललिता मर्यादाश्रिता च भवति। सा आदौ साधारणपरिचारिकारूपोण दृश्यते किन्तु क्रमेण तस्याः अन्तर्निहितं कुलीनत्वं भावगाम्भीर्यं प्रेमिकात्वं च प्रकाशितम्। मालविका केवलं रूपमाधुर्यस्य प्रतिमूर्तिनी न अपि तु आत्मगौरवसमन्वितस्त्रीरूपेण

कालिदासेन प्रेमिकाचरित्रं स्वीकृतम्। तस्याः प्रेमस्य आद्यावस्ता लज्जामयी। यदा सा नाटकस्य प्रारम्भे अग्निमित्रस्य दृष्टिगोचरा भवति तदा तस्याः हृदये अनीर्वचनीयस्पन्दनम् उदेति। तया उक्तम्-

"दुल्लहो पिओ तस्सिं भव हिअअ ! णिरासं,
अस्मो अपङ्गओ मे फूरइ किं पि वामओ।
एसो सो चिरदिट्ठो कहं उण दट्टवेवा,
णाह सं पराहीणं तुइ गणअ सतिण्णम्।।"[10]इति।

सा न केवलं दैहिकसौन्दर्येण उपस्थिता अपि तु तस्याः नृत्यकौशलं संगीतानुरागः विनयशीलता च तस्याः व्याक्तित्वस्य अविभाज्यगुणाः। नृत्यप्रदर्शनकाले तस्याः हृदयस्य स्पन्दनं प्रतिबिम्वितं भवति। सा अग्निमित्रम् अभितः प्रत्यक्षरूपेण स्वहृदयस्य प्रणयभावं न प्रकाशयति किन्तु संगीतादिकलानां माध्यमेन संकेतप्रदानं करोति। परिचारिकया कथितम्-

"अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः,
पादन्यासो लयमुपगतस्तन्मयत्वं।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ,
भावो भावं तुदति विषयाद्रागवन्धः स एव।।"[11]इति।

आत्मगौरवभावः मालविकायाः प्रणयस्य अन्यतमः वैशिष्टः। परिचारिकारूपेण तस्याः अवस्थानकाले स्वाभिमानस्य चित्रं दृश्यते। सा प्रतिकूलपरिस्थितौ धैर्यं धारयति। तन्मध्ये स्त्रीचरितस्य प्रगल्भत्वं संकोचबाधितत्वं मर्यादितानुरागत्वं च उपलभ्यते। मालविकायाः प्रणये करूणरसस्य प्रभावः परिलक्ष्यते। तस्याः प्रणयः यदा गुप्तरूपं भवति, तदा सा दुःखं सहते, स्वचिन्तने निमग्ना भवति। अत्र तस्याः सहनशीलता प्रकाशिता। मालविकायाः चरित्रे संकोचवोधः वारं वारं दृश्यते। तया उक्तम्-"जाणामि णिमित्तं मह कोदुआलंकाकस्स, तह वि मे हिअअं विसिणीपत्तगदं विअ सलिलं वेवदि। दक्खिणेदरं णअणं अ बहुसो फुरसि"[12] इति। तस्याः चरित्रे उदारता दृश्यते। सा अन्वेषां प्रति द्वेषं न वहति। नाटकस्य अन्तिमे तस्याः प्रणयः सामाजिकस्वीकृतिं प्राप्नोति। अत्र सा लज्जावती अपिच आनन्दिता भवति। कालिदासेन मालविकायाः प्रेमिकास्वरूपम् अत्यन्तं सौम्यतया चित्रितम्। मालविका माधुर्यस्य प्रतिमूर्तिः। अतः मालविका प्रेमिकास्वरूपे न केवलं नाटकस्य श्रृङ्गाररसस्य आधारभूता अपि तु स्त्रीहृदयस्य लज्जामधुरताविनयधैर्यात्मगौरवसमर्पणसंयतादिगुण-युक्ता।

**विक्रमोर्वशीये-**

विक्रमोर्वशीयमिति नाटकं महाकविना कालिदासेन विरचितं शृङ्गारप्रधाननाटकेषु विशेषस्थानं धारयति। प्रेमिकरूपेण पुरुरवा महाकविकालिदासस्य अनन्या सृष्टिः। प्रेमिकः पुरूरवा न केवलं वीरनृपः अपि तु अत्यन्तसंवेदनशीलः, विरहविह्वलः च। दानवकलादुह्तायाः उर्वश्या अप्रतिमलावण्यमालोक्य नृपः पुरुरवा मोहितोऽभूत्। राजा पुरुरवा स्वरथेन आगमनकाले स्थिरयौवनां हतचेतनां उर्वशीं दृष्ट्वा विस्मृतः अभवत्। उर्वश्याः चेतनायाः प्रत्यागमनम् अवलोक्य राजा उक्तवान् – सुन्दरि ! समाश्वसिहि ।

"गतं भयं भीरु सुरारिसम्भवं
त्रिलोकरक्षी महिमा हि वज्रिणः।
तदेतदुन्मीलय चक्षुरायतं
महोत्पलं प्रत्युषसीव पद्मिनी ।।"[13]इति

केशिदानवस्य कवलादुद्धताम् हतचेतनामुर्वशीमादाय हेमकुटशिखरं प्रत्यागच्छतः पुरुरसवः आश्वासनवाक्यमिदम् उर्वशीं प्रति। केशिदानवेन अपहरणकाले भीतिविह्वला दिव्याङ्गना उर्वशी मूर्च्छामवाप। विक्रमैकरसेन पुरुरवसा दानवकवलादुद्धृतापि सा संज्ञाहीना विद्यते। किन्तु सम्पत्ति दुरीभूतो राक्षसभयः। त्रिलोकरक्षकस्य देवराजस्य महिम्नैव एतत् सम्भवति । अत्र नास्ति पुरुरवसः किमपि कृतित्वम्। अनेन राज्ञो महानुभवत्वं तथा निरहङ्कारित्वं समभिव्यञ्जितम् । उर्वश्याः प्रथमदर्शनकाले कामदेवो पुरुरवसः हृदयं शराघातेन सच्छिद्रं कृतवान्। उर्वशीं प्रति समासक्तचेतसो राज्ञः पुरुरवसः उक्तिः यथा –

"आ दर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम्।
वाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ।।"[14] इति

हेमकुटशिक्षरे रथेनावतरणवेलायां नयोः रससंघट्टनं जातं येन उभयोः कामो लब्धाङ्कुरो बभूव। सखीभिः सह प्रस्थितायाम् उर्वश्यां तद्गतचिन्तया पुरुरवसः दुर्लभाभिलाषी मनोरथः। इन्द्रस्याह्वानमनुमानयन्त्या उर्वश्या सखीहि सह सहसा आदृष्टः पुरुरवा। तस्याः प्रस्थानकाले पुरुरवसः शरीरात् तस्य मनस्तया सहसा आकृष्य नीतमिति –

"एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती।
सुराङ्गना कर्षति खण्डितागात् सूत्रं मृणालादिव राजहंसी ।।"[15] इति

उर्वशीं पञ्चशरविद्धामवगम्य तस्यानुरागः प्रगावतरोऽभूत् । राज्ञीम् औशीनरीं प्रति तस्य दाक्षिण्यससम्प्रमकर्तव्यादिकं नासीदिति न, तथापि अमर्त्यामुर्वशीं प्रति ज्ञायमानोऽनुरागस्तमेव राजानं मर्त्यमानवीहृदयात् प्रसह्य दुरं नीतवान्। उर्वश्यामात्मनोऽनुरागं गोपयितुं तेन छलः तमाश्रितः। भूर्जपत्रगम् उर्वशीविरचितं प्रेमपत्रमादाय उपस्थितायामौशीनय्या राज्ञा उक्तम् – "देवि ! नेदं मया मृत्यते। स खलु परमन्वेपणार्थमारम्भोऽयम् ।" रहस्यभेदभीताः प्रणयिनः प्रायेण मिथ्याश्रित्य त्रयां दुरकरोतीति नृप तेराचरणमिदं न तु दोषावहम् । विश्वकविना रवीन्द्रनाथेन उक्तम् यथा –

"অকপটে মথিয়ারে সে করয়িা মধুর
লজ্জা তার কর্রা দিয়ে দূর ।"

तथापि स्थितायामेतादृश्यां सहधर्मचारिण्यां पतिव्रतायामौ-शीनय्यां राज्ञ उर्वश्याम् आशक्तिः समर्थनीया न वेति साम्प्रतिकैः

सहृदयैर्विवेचनीयम्। परकीयाप्रीतिरधुना समाने निन्दनीया। किन्तु तदानीन्तनकाले वीरभोग्यः वसुन्धरेव वीरभोग्या वरङ्गना इति नीतिः सामाजिकैः अनुमोदितासीत् इति न संशयः ।

एकदा उर्वशी इन्द्रस्य आह्वानेन स्वर्गलोकं गतवती। उर्वश्याः अनुपस्थितौ राजा विह्वलः ज्ञातः। परवर्तिनि काले भरतस्य शापेन स्वर्गभ्रष्टां उर्वशीं स सहधर्मिनीरूपेण लब्धवान् । कुमारवनं प्रविष्टायाः प्रियायाः सहसा अन्तधानेन विस्मितः पुरुरवा अरण्ये प्रियायाः अन्वेषणं कृतवान्। प्रियायाः कृते राज्ञो विलापगीतैः अत्र तस्य प्रेमिकहृदयस्य प्रेमतः पातालपरिस्पर्शीं तलोऽनुमीयते। प्रियाविरहेन नरपतेर्मानसिकी अवस्था जातेतादृशी येन स चेतनाचेतननिर्विशेषेण मयुरकोकिल-हंस-चक्रवाक्-भ्रमर-गज-पर्वत-नदी प्रभृतीन् प्रियायाः सन्देहाम् अपृच्छत्। तथा च वनमपूरम् उद्दिश्य स उक्तवान् –

"नीलकण्ठ ममोत्कण्ठ वनेऽस्मिन् वनिता त्वया ।

दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टि क्षमा भवेत् ।।"[16]इति

"सर्वक्षितिभृतां नाथ दृष्ट्वा सर्वाङ्गसुन्दरी।

रामा रम्ये वनोद्देशे मया विरहिता त्वया।।"[17] इति

राज्ञः उर्वशीं प्रति उन्मत्तवदाचरममिदं तस्य प्रेमिकनिष्ठतायाः परिचयकम्। विरहोन्मत्तायाः एवं चित्रं अन्यत्र दुर्लभम्। राज्ञः पुरुरवसः प्रेमभावेन एव स्वर्गविहारिणी उर्वशी स्वर्गस्य मायां त्यक्ता मर्तमानवस्य प्रणये आवद्धा आसीत्। अत्रैव यथार्थप्रेमिकरूपेण पुरुरवाचरित्रं महाकविकालिदासेन चित्रितम्। अन्ते सङ्गमनीय-मणिप्रभावेन उर्वशीं लब्धा आनन्दविह्वलराजा सङ्गीतेन अन्तरस्य विषादप्रकाशं कृतवान्। एतत् तु राज्ञः प्रेमैकनिष्ठतायाः परिचायकम्। उक्तं तेन –

"मयुरः परभृतो हंसो रथाङ्गः

अलिर्गणः पर्वतः सरित् कुरङ्गमः

तव कारणेनारण्ये भ्रमता-

को न खलु पृष्ठो मया रुदता ।।"[18] इति

अत्र कालिदासेन पुरुषहृदयस्य कोमलमावस्था निर्भीकतया प्रकाशयता। प्रेमस्वरूपं मानवीयगौरवरूपेण उपस्थपितम् कविना। पुरूरवसः प्रणये संवेदनशीलता परिपूर्णा। अत्र प्रणयस्य उन्मत्तावस्था दृश्यते। पुरूरवा राजर्षिपुरुषः तथापि स प्रेमविषये साधारण-मनुष्यवत् आचरति। विरहकाले स लतासु उर्वश्याः प्रतिविम्वनं पश्यति अपिच नदीनां शब्दे तस्याः स्वरं शृणोति। कालिदासेन पुरूरवसः चरितं मानवीयसंवेदनशीलतया आत्मविस्मृत्या विरहेन विनयेन आत्मवोधेन च अङ्कितम्।

महाकविना कालिदासेन विक्रमोर्वशीयमिति त्रोटके प्रेमिकारूपेण ऊर्वशीचरितं चित्रितम्। सा आलोकसामान्यरूपस्य लावण्यस्य अधिकारिणी। ऊर्वश्याः सौन्दर्यम् अवलोक्य पुरूरवा चिन्तयति-

"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः

शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतुहलो

निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः।।"[19] इति

पुरा किल अप्सरसां रूपमिदं धर्षयितुं भगवता नारायणमुनिना आत्मन ऊरुदोशात् काचिदप्रतिमरूपसम्पन्ना कन्यका पादुर्भविता। ऊरूदेशसम्भवत्वेन अस्या ऊर्वशीति नाम पौरानिकमतम्। किन्तु अधुना ऊर्वश्याः अप्रतिमं रूपमालोक्य तस्याः निर्माणे वेदाभ्यासजडस्य विषयभोगनिर्वृत्तस्य पुरातनस्यस्य मुनेः स्थूलहस्ता-वलेपः कथं सम्भवेति सन्देहः राज्ञःसमुपजात इति। केशीदानवस्य अधीनतः पुरूरवसा ऊर्वशी उद्धारिता। दानवस्य भयेन मूर्च्छिता ऊर्वशी यदा पुरूरवसं दृष्टवान् तदा तस्याः हृदि प्रेमोन्मोचनम् अभवत्। प्रथमदर्शने एव ऊर्वशी आकृष्टा अभवत् मर्तमानवं प्रति। इन्दस्य आह्वानेन हेमकुटपर्वततः सखिभिः सह स्वर्गं प्रत्यागमनकाले छलेन विलम्वनं कृतवती। सा प्रथमाङ्के उक्तवती-"अम्मो लताविडव एआवली वैअअन्तिआ मे लग्गा, चित्तलेहे मोआवेहि दावणम्" इति(अम्महे लताविटपे मे एकावली वैजयन्तिका लग्ना, चित्रलेखे मोचय तावदेनाम्)। पुरूरवसं प्रति अनुरागवशात् ऊर्वश्याः वारं वारं मर्तभूमिं आगता। द्वितीयाङ्के सा चित्रलेखया सह तिरस्करणी-विद्याप्रभावेण अदृश्यरूपेण उपस्थिता राज्ञः प्रमोदकानने। प्रणयासक्ता ऊर्वशी तत्र राज्ञः पुरूरवसः प्रेमावस्थां ज्ञातवती। सा भूर्यपत्रेण मनसः वार्तां लिखित्वा प्रेषितवती नृपस्य समीपम्। प्रेमपत्रं दृष्ट्वा राजा व्यकुलः जातः, तदा ऊर्वश्या स्वरूपं प्रकाशितम्- "जेदु महाराओ" इति। देवदूतस्य आह्वानेन भरतप्रणीतनाटके अभिनयार्थं उर्वश्याः प्रत्यागमनवार्ताम् आगतम् किन्तु पुररवसं प्रति तस्याः अनुरागः शयने स्वपने च उत्भासितः। पुररवसः प्रणयेन ऊर्वश्याः स्वर्गगमने अनीहा दृष्टा। भरतस्य नाटके लक्ष्मीभूमिकायाः अभिनयकाले 'पुरुषोत्तम' इति शब्दस्य उच्चारणसमये ऊर्वश्याः मुखात् 'पुरुरवा' इति शब्दः निर्गतः। ततः भरतस्य अभिशापेन उर्वश्याः पुनः मर्तागमनम् अभवत्। अपिच प्रियतमेन सह तस्याः मिलने किमपि समस्या न आगता। प्रणयस्य प्रतिद्वन्द्विनीम् औशीनरीं प्रति तस्याःअसूयाहीनता अभिनन्दनयोग्या। राजर्महिषीं प्रति ऊर्वशी श्रद्धाशीला आसीत्। तया उक्तं यथा- "हला ठाणे कसू इयं देवीस्द्देण उवअरिअदि। ण किंपि परिहीअदि अचित्र ओजस्सिदात्र"(हला, स्थाने इयं देवीशब्देनोपचर्यते। न किमपि परिहीयते शच्चा ओजस्वित्वया) इति।

प्रायेण कदापि प्रेमिकया प्रतिद्वन्द्वी न सह्यते। अत्रापि पतिप्राणा ऊर्वशी उद्भिन्नयौवनां विद्याधरकन्यां प्रति क्रुद्धा जाता। प्रेमिकायाः एतत् वैशिष्ठं स्वाभाविकम्। पुरूरवसः स्मरणं कुर्वती ऊर्वशी प्रवेशनिषिद्धं कुमारवनं प्रविश्य लतारूपस्य धारणं कृतवती। सा लतारूपधारणं कृत्वा अपि अन्तश्चेतनया प्रियतमस्य विरहव्याकुलताम् अनुभवति। अनन्तरं विच्छेदानलेन दग्धा सा ऊर्वशी सङ्गलीयमणिः स्पर्शेन स्वरूपं प्राप्तवती। प्रियतमस्य विच्छेदभयात् पुरूरवसः अगोचरे स्वगर्भजातपुत्रं महर्षिच्यवनाय दत्वा प्रेयामास। वस्तुतः ऊर्वशी पुरूरवसः प्रणयसुखं प्राप्तुं सर्वदा चेष्टितवती।

अत्र कालिदासेन ऊर्वशी स्वर्गीयसुन्दरी अप्सरा प्रेमविह्वला भावपगल्भा च स्वरूपेण चित्रिता। सा पुरूरवसं प्रति समर्पिता किन्तु स्वगौरवं न त्यजति। कालिदासेन दैवीस्त्रीरूपत्व-ऊर्वशीमध्ये

मानवीयदुःखानुभवः आरोपितः कृतः। ऊर्वश्याः चरित्रे मुख्यगुणः स्वातन्त्र्यबोधः। यद्यपि तस्याः शरीरः देवसभायाम् अस्ति तथापि तस्याः हृदयं पुरूरवामध्ये व्याकुलम्। अतः ऊर्वशी संस्कृतनाटकेषु प्रेमिकारूपेण विशेषस्थानं लभते।

**अभिज्ञानशकुन्तले –**

महाकविना विरचितं अभिज्ञानशकुन्तलमिति नाटकं संस्कृतसाहित्ये शृङ्गाररसस्य सर्वोत्कृष्टप्रतिमानरूपेण सुप्रतिष्ठितम्। अस्मिन् नाटके दुष्मन्त-शकुन्तलयोः प्रेम आदर्शमानवीयप्रेमस्य मूर्तस्वरूपेण उपस्थापितम्। अत्र दुष्यन्तः प्रेमिकरूपेण सुव्यक्तित्वं धारयति। स केवलं न रूपासक्तः कामुकः, अपि तु भावुकः, चिन्ताशीलः, धार्मिकः, धर्मसंशयपीडितः, स्मृतिविहलः च आदर्शप्रेमिकः। हस्तिनापुराधिपतिना दुष्यन्तेन एकदा मृगयार्थं मृगस्य अनुसरणं कुर्वन् ऋषेःकण्वस्य आश्रमस्य उपकण्ठं समागतम्। तत्र वैखानसाः अकस्मात् आगत्य "न खलु न खलु वाणःसन्निपात्योऽयमस्मिन्" इत्यादिरूपेण नृपं वारयति। ततः राज्ञा दुष्यन्तेन तस्य वाणं संयतम्, अतःवैखानसाः आशीर्वचसा तं पुत्रपाप्तये नन्दयति। अपिच अतिथिसत्कारलाभाय राजानम् आमन्त्रयन्ति। अत्र आदौ मृगयाकाले दुष्यन्तस्य चित्तं क्षात्रधर्मे स्थितं किन्तु आश्रमपरिसरे प्रमेशमात्रेण तस्य अन्तकरणे सौमपरिवर्तनप्रवाहः प्रारभ्यते। आश्रमस्य शान्तपरिवेशः, ऋषिसंस्कृतिः, तपोवनस्य विशुद्धता च तस्य मनसि प्रभावं जनयति। आश्रमप्रवेशकाले राज्ञः दक्षिणवाहुस्पन्दनं भवति। राजा दुष्यन्तः चिन्तां करोति कथम् आश्रमे दिव्याङ्गलाभः भविष्यति?

"शान्तमिदमाश्रमपदं स्फुरति च वाहुः कुतःफलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र।।"[20]इति

अनन्तरम् उत्कण्ठितो भूत्वा राजा अग्रं चलति, तदा तस्य दृष्टिपथे कल्पलोकस्य द्वारम् उन्मोचयति। दक्षिणेन वृक्षवाटिकां दृष्टिं निक्षिप्य राजा विस्मयविमूढः भूत्वा अवदत्-"अहो मधुरासां दर्शनम्" इति। तदा वृक्षसेचनरताः मुनिकन्याः दर्शं दर्शं राजा दुष्मन्तः आनन्दम् अनुभवति। एतेषां रूपमाधुर्यादिकं च आश्रमे वनलता तु अयत्नलालिता अपि नैसर्गिकसौन्दर्यसुगन्धादिभिः जनचित्तं सन्तोषयति। एवं स्वभावजाता अयन्तलालिता वनलता यदि गुणैः उद्यानलताम् अतिशेते, तर्हि तत् सत्यमेव विस्मयप्रदं भवति। उक्तं च तेन-

"शुद्धान्तदुर्लभमिदं वपुः आश्रमवासिनः यदि जनस्य।
दुरीकृताः खलु गुणैरुद्यानलताः वनलताभिः।।"[21]इति

प्रेमिकरूपः राजर्षिः दुष्यन्तः वल्कलपरिहितां निसर्गरमनीयां शकुन्तलां संवीक्ष्य स्वभावसौन्दर्यस्य रम्यत्वं वर्णयति। कमलं शैवलजालेन आच्छन्नमपि लोकानां नेत्रअञ्जनं करोति। एवं श्शचिह्नं मलिनमपि तत् चन्द्रस्य सुषमां प्रकाशयति। तथाच इयं पुरो दृश्यमाना तपोवनवाला शकुन्तला वल्कलवसनपरिहिता अपि स्वभावसौन्दर्येण नितरां मनोरमा दृश्यते। निसर्गसुन्दरीणां किमपि अलंकारेण प्रयोजनं नास्ति। उक्तं च कविना-

"सरसिजमतुविद्धं शैवालेनापि रम्यम्
मलिनमपि हिमांशोः लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वक्ललेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।"[22] इति

एवं क्रमेण दुष्यन्तः शकुन्तलां प्रति सहानुभूतिप्रवणोऽभवत्। आश्रमस्य कर्मसु नियुक्तं शकुन्तलां दृष्ट्वा राज्ञा कथितम्- अयं कुलपतिः कण्वः असाधुदर्शी। अतिपेलवस्य पद्मदलस्य कठिनशमीशाखां छेत्तुं यः चेष्ठते स यथा उपहास्यतां याति, तथा कुसुमकोमलां शकुन्तलां तपोवनस्य कठिनकर्मसु महर्षिः कण्वः अपि सर्वेषाम् उपहासभाजनं भवति-

"इदं किलाव्याजमनोहरं वपुः तपक्षमं साधयितुं यः इच्छति।
ध्रुवं सः नीलोत्पलपत्रधारया शमीलतां छेत्तुमृर्षिर्व्यवस्यति।।"[23] इति

शकुन्तलायाः रूपस्मत्तिविमोहितः राजा न केवलं शकुन्तलां प्रति प्रणयाकृष्टो भवति, परं तु तया सह स्वपरिणययोग्यत्वादिकमपि विचारयति। यदा कश्चित् मधुकरः नवमल्लिकालतां परित्यज्य शकुन्तलामुखमण्डलमनुसरति तदा शकुन्तलया निवारयितुं न शक्यते। प्रेमिकः यथा प्रेमिकायाः अधरं पातुं इच्छति तथैव राजापि शकुन्तलायाःअधरपानार्थं कर्णे मन्त्रणार्थं कपोलादिस्पशार्थं च भ्रमरं प्रशंसति आत्मानं निन्दयति च। उक्तं यथा-

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कण्वान्तिकचरः।
करौव्याधुन्वत्याःपिवसि रतिस्वर्वस्वमधरं
वयं तत्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।"[24] इति

मुनिकन्यायां सञ्जाताभिलाशः राजर्षिः दुष्यन्तः तस्याः परिणयार्हत्वम् उत्प्रेक्षमाणः निष्कलुषात्वचित्तवृत्तिम् एव प्रमाणीकरोति। मुनिवालायां शकुन्तलायां राज्ञः दुष्यन्तः अभिलाषः सञ्जातः। परं तु यदि इयं शकुन्तला ब्राह्मणकन्या भवेत्, तदा अनया सह राज्ञः परिणयः न सम्भवति। एषा शकुन्तला दुष्यन्तस्य परिणययोग्या वा नवा इति सन्देहविषयीभूते पदार्थे प्रमाणान्तराभावे राज्ञः दुष्यन्तस्य हृदयवृत्तिरेव अनुसन्देया। साधुनां सन्धिग्धविषये विवेकस्य निर्देशः माननीयः। अतः राजा दुष्यन्तः तस्य चित्तवृत्तिम् एव प्रमाणीकुर्वन् शकुन्तलायाम् अभिलीषः साधुत्वेन अवधारयति। सा एव क्षत्रियवाला इति तस्य अभिलाषः। अस्मिन् विषये मनुना उक्तं-

"वेदोऽखिलो धर्ममूलं स्मृतिशीले तद्विदाम्।
आचारश्चैव साधूनाम् आत्मनः तुष्टिरेव च ।।"इति

राज दुष्यन्तः आत्मानं प्रति शकुतलायाः भावं चिन्तयति यत् यथा अस्याम् अहमनुरत्रोऽस्मि तथा इयं शकुन्तला मां प्रति किम् अनुरक्ता ? ततः राजा अनुमानं करोति यत् शकुन्तलायाः अनुरागः अपि प्रकटितः अस्ति। दुष्यन्तस्य वचनैः सह शकुन्तला वाचं न मिश्रयति

सम्मेलयति, अपिच सा राज्ञः वचनं शृणोति। यद्यपि दुष्यन्तस्य सम्मुखे प्रत्यक्षं न तिष्ठति, तथापि अस्याः शकुन्तलायाः दृष्टिः अन्यत्र आसक्ता नास्ति। वसुतः अत्र कालिदासः नामिकायाः शकुन्तलायाः नायकं दुष्यन्तं प्रति अनुरागस्य वर्णना कृता। अस्मिन् प्रसङ्गे साहित्यदर्पणकारेण विश्वनाथेन उक्तं यथा-

“दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति।
प्रच्छन्नं वा भ्रमन्नं वा अतिक्रान्तं पश्यति प्रियम्॥
बहुधा पृच्छ्यमनापि मन्दमन्दमधोमुखी।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते।
अन्यैः प्रवर्तितां शश्वत् सावधाना च तत्कथाम्।
शृणोत्यन्यत्र दन्ताक्षी प्रिये वालानुरागिणी ।।” इति

प्रेमिक : यथा प्रेमिकायाः रूपवर्णनं करोति तथा दुष्यन्तः अपि शकुन्तलायाः रूपं वर्णयति-

“अधरः किसलयरागः कोमलविटपानुकारिनौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम।।”[25]इति

रवीन्दनाथेत निगदितं यथा -

“অধর কিসলয় রাঙিয়া আঁকা, যুগল বাহু যেন কোমল শাখা।
হৃদয় লোভনীয় কুসুম হেন, তনুতে যৌবন ফুটেছে যেন ।।”इति

ज्योतिरिन्द्रिनाथठाकुरमहोदयेन अनुवादं कृतम्-

“আরক্তিম ওষ্ঠাধর নবকিশলয়
বাহু দ্বয় যেন আহা কচি শাখা দুটি।
লোভনীয় ফুলসম সারা অঙ্গময়
যৌবন সহসা যেন উঠিয়াছে ফুটি।।”इति

शकुन्तलायाः अपरूपरूपयौवनेन जनचित्ततोषिनं करोति। इदृशं रूपं मानुषीषु क न लभ्यते। दुश्यन्तेन उक्तं यथा-

“मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।”[26]इति

शकुन्तला राजदर्शनात् परं मदनवाणेन आहता प्रणयपाशवद्धा च। तस्याःहृदयाकाशे नवीनानुरागः उद्भाषितः परन्तु अनसूया-प्रियंवदे अस्मिन् विषये अज्ञाते स्तः। सखीभ्यां सह संवादेषु स्वहृदयस्य भावान् गोपयितुं प्रयतते , किन्तु तस्याः मुखमण्डले नेत्रयोः च भावः प्रकाशितः। अत्र कालिदासेन स्त्रीहृदयस्य स्वाभाविकलज्जा अलंकाररूपेण चित्रिता। सा प्रेमिकारूपा शकुन्तला गभीरा स्थितिः, या न सुपरिज्ञेया। मुनिकन्यायाः मनसि नवोदिता आकाङ्खा लुक्कायिता अस्ति। वसुतः केवलम् आन्ममनसि सा प्रणयम् अनुभवति। सा आत्मजिज्ञासां करोति अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के -“कि न खलु इमं प्रेक्ष्य तपोवनविरोधिनः विकारस्य गमनीयास्मि संवृत्ता” इति। दुष्यन्तं प्रति तस्याः प्रणयभावं सखीभ्यामपि गोपनीयं ररक्ष। किन्तु किञ्चित् कालात् अनन्तरमेव सा प्रकाशिता तृतीयाङ्के- “यतः प्रभति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः, तत आरभ्य तदगतेन अभिलाषेन एतदवस्था असि संवृत्ता” इति। शकुन्तला मदनवाणहता भूत्वापि संयता सा कथमपि न प्रकाशितवती । सा शकुन्तला पितुः अनुपस्थितौ स्वातन्त्राहीनतां विज्ञापितवती-“पौरव, रक्ष विनयम्। मदनसन्तप्तापि न खलु आत्मनः प्रभवामि सुचतुरस्य प्रणयनिपुणस्य राज्ञः गान्धर्वपरिणये आत्मसमर्पणं कृतवती शकुन्तला। कालिदासः शकुन्तलां चारित्रगौरवेण महिमान्वितां विहितवान्।

रवीन्द्रनाथेन प्राचीनसाहित्ये शकुन्तलायाः वर्णनं कृतम्-

“সে অরণ্যের সরলা মৃগীর মতো,
নির্ঝরের জলধারার মতো,
মলিনতার সংস্রবেও অনায়াসেই নির্মল।।”इति

प्रेतिका शकुन्तला ध्येयस्य चित्तने सा विलुप्तसंज्ञा। अनश्वरं प्रेम अविचला भक्तिः प्रीतिश्च तस्याः प्रेमिकोपचाराः। प्रेमिकव्रता सा कदाचित् दुष्यन्तचिन्तने रता सती आत्मकर्तव्यं विस्मृतवती, तस्मात् सा शकुन्तला दुर्वाससः अभिशापेन अभिशप्ता। कीदृशी सा दुष्यन्तं प्रति मुग्धा प्रेमप्रभावापन्ना कोमलप्रकृतिश्च आसीदिति अनेन शापवृत्तात्रेन ज्ञायते। दुष्यन्तस्य विस्मरणकाले शकुन्तलायाः अत्मगौरवम् अत्यन्तं प्रकाशितम्। राजसभायां अस्वीकारेऽपि सा स्वपावनतां न परित्यजति। तस्याः वचनानि सत्यनिष्ठापूर्णानि सन्ति। अत्र प्रेमिकायाः शकुन्तलायाः चरित्रे सत्यपरायणतायाः आत्मसम्मानस्य पतिव्रतनिष्ठायाः च समन्वयः दृश्यते।

**निष्कर्षः**

समग्रतया अवलोकेन वक्तुं शक्यते यत् कालिदासस्य रूपकेषु नायकाः न केवलम् आधिकारिणः पुरुषाः अपि तु विरहव्यकुलाः भावुकाः समर्पिताः च। मालविकाग्निमित्रे अग्निमित्रः अनुरक्तः प्रेमिकः, विक्रमोऽर्वषीये विरहविह्वलः प्रेमिकः, अभिज्ञानशकुन्तले दुष्यन्तः पूर्णाङ्गप्रेमिकः च। कालिदासेन तस्य रूपके एतेषां प्रेमिकचरित्रेषु पुरुषहृदयस्य प्रेमभावः कोमलता संवेदनशीलता च प्रकाशते। प्रेमिकाः न केवलं रूपवत्यः नायिकाः अपि च आत्मगौरवयुक्ताः धर्मनिष्ठाः धैर्यशीलाः विरहवेदनासंयुक्ताः च। मालविकाग्निमित्रे मालविका विनयवती, विक्रमोर्वशीये ऊर्वशी स्वाभाविकभावप्रकाशिनी, अभिज्ञानशकुन्तले शकुन्तला आत्मसम्मानसंयुक्ता च। कालिदासस्य रूपके प्रणयः प्रेमिक-प्रेमिकानां चरित्रेषु मानवजीवनस्य समग्रचित्रणमेव प्रस्फुटितम्। अत्र प्रणयस्य भावात्मकं नैतिकम् आध्यात्मिकं संस्कृतिकं च तत्त्वं निरूपितं महाकविना इति शिवम्।

**।। <u>सहायकग्रन्थसूची</u> ।।**

१. कालिदासः, अभिज्ञानशकुन्तलम्; सम्पा. डःसत्यनारायणचक्रवर्ती, कोलकाता, संस्कृतपुस्तकभाण्डार,२००८।

२. कालिदासः, अभिज्ञानशकुन्तलम्; सम्पा. डः अनिलचन्द्रवसुः, कोलकाता, संस्कृत-वुक-डिपो, २००८।

३. कालिदासः, मालविकाग्निमित्रम्; सम्पा. श्रीयुक्त-रेवतीकान्त-भट्टाचार्यः, प्रकाशकः-अखिलबन्धुभट्टाचार्यः,२००२।

४. कालिदासः, विक्रमोर्वशीयम्; सम्पा. ड. सीतानाथ-आचार्यशास्त्री ड. देवकुमारदासः च, संस्कृतपुस्तकभाण्डार, १९९९।

५. मम्मटाचार्यः, काव्यप्रकाशः (प्रथमतः दशमोल्लासः) ; सम्पा. महामहोपाध्यायडःगङ्गानाथझा, वाराणसी, भारतीयविद्या-प्रकाशन, १९६७।

६. धनञ्जयः, दशरूपकम्; सम्पा. डःश्रीनिवासशास्त्री, मेरठे साहित्य-भाण्डार, १९६९।

७. विश्वनाथः, साहित्यदर्पणः; लक्ष्मीटीकासमेतः, सम्पा. श्रीकृष्ण-मोहनशास्त्री, वाराणसी, चौखाम्वासंस्कृतसीरिजअफिसप्रकाशन, १९४७।

८. श्रीराजानाथतर्कवाचस्पति- भट्टाचार्यः, वाचस्पत्यम्; वाराणसी, चौखम्बा-संस्कृत-सीरीज-अफिस, २००३।

९. राजाराधाकान्तदेव-बाहादुरः, शब्दकल्पद्रुमः; वाराणसी, चौखम्बा-संस्कृत-सीरीज-अफिस,२००१।

१०. संस्कृतवाङ्मयस्य इतिहासः; सम्पा. धीरेन्द्रनाथवन्द्योपाध्यायः, कलिकाता, संस्कृतपुस्तकभाण्डार, २०१४।

११. কালিদাসের রচনাবলী; সম্পা. অশোককুমার বন্দ্যোপাধ্যায়, কোলকাতা, সারস্বত কুঞ্জ, ২০১৯ ।

१२. मनुसंहिता; सम्पा. डः अनिल चन्द्र वसु, संस्कृत-वुक-डिपो, कलिकाता, २०१३।

१३. https://www.library.ucdavis.edu/tag/sanskrit/

१४. http://www.sanskritebooks.org/

**पाद टिप्पणी:**

1 अद्यैतवेदान्ते ३-३०-०१

2 मालविकाग्निमित्रमिति नाटकस्य प्रथमाङ्के

3 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.१

4 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.२

5 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.३

6 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.५

7 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.६

8 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के

9 मालविकाग्निमित्रमिति नाटकस्य तृतीयाङ्के ३.१

10 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.४

11 मालविकाग्निमित्रमिति नाटकस्य द्वितीयाङ्के २.८

12 मालविकाग्निमित्रमिति नाटकस्य पञ्चमोऽङ्के

13 विक्रमोर्वशायमिति नाटके- १.५

14 विक्रमोर्वशायमिति नाटके- २.२

15 विक्रमोर्वशायमिति नाटके- १.१८

16 विक्रमोर्वशायमिति नाटके- ४.९

17 विक्रमोर्वशायमिति नाटके- ४.२७

18 विक्रमोर्वशायमिति नाटके- ४.३१

19 विक्रमोर्वशायमिति नाटके- १.८

20 अभिज्ञानशकुन्तले १.१५

21 अभिज्ञानशकुन्तले १.१६

22 अभिज्ञानशकुन्तले १.१८

23 अभिज्ञानशकुन्तले १.१७

24 अभिज्ञानशकुन्तले १.२१

25 अभिज्ञानशकुन्तले १.१९

26 अभिज्ञानशकुन्तले १.२३